कल्पितत्कुलाकल्पोपपद्यते॥२१॥ नन्वविषये ब्रह्मण्यासमानि विषयिण्यध्यासो
नसिध्यति पुरोवस्थितेशुक्तिकादौ विषये विषयान्तरस्य रजतादेरध्यासद
र्शनादित्याशंक्य व्यभिचारमाह॥ आसनीमहत्वपासोऽध्यो प्रतिषेध्य चस्तपो
वचा॥ मलोध्यासनिषेधो रवक्रियत न चयथा बुधैः॥२२॥

तो३

यथा देहव्यतिरिक्तात्मवादिनामात्मनि जन्मजराद्यध्यासस्य प्रतिषेधः क्रियते यथा वा
विवेकिनां शरीरकार्श्यमलाद्यध्यासनिषेधो ऽद्रिपगाद्यपि क्रियते तेन प्रात्मनि प्रसिद्धिमात्रेण
दुःखाद्यध्यासस्य निषेधो भवतीति न शक्यो परिहर्तुमित्यर्थः ॥२२॥ कस्मात्पुनरात्मनि परमा
र्थ एव प्राप्तः संसारो न निषिध्यते तत्राह ॥ प्राप्तस्य प्रतिषिध्यते मोक्षो ऽनित्यो भवेद्ध्रु
वं ॥ प्रमाणसिद्धस्य बंधस्य प्रतिषेधे तन्निवृत्तिलक्षणस्य मोक्षस्यागंतुकत्वात् अनित्यत्वमाव
श्यकं स्यादित्यर्थः ॥ प्रामाणप्राप्तस्य संसारस्य प्रतिषेधासंभवात् क्रियायामिवाग्निचयनेनो
तरिक्षे न दिवि इति क्रमप्राप्ते यथा प्रतिषिध्यते तथा प्रमाणप्राप्तस्य संसारस्यात्मनि प्रतिषि
द्धस्य प्रतिषेधो ऽयमिति फलितमाह ॥ अतो ऽप्राप्तनिषेधो ऽयं क्रियायामग्निचयनादिवत् ॥२३॥
आत्मनि बंधस्य बंधबोधकप्रमाणाभावादपि न तत्र बंधस्य सत्यताप्राप्तिरस्तीत्याह ॥ संभाव्यो गो
चरे शब्दः प्रत्ययो वा न चान्यथा ॥ न संभाव्यो ऽलदात्मत्वादहंकर्तुं स्पृष्ट एव वा ॥२४॥ न चान्यथ
सगोचरे शब्दः प्रत्ययो वा लोके संभाव्यते ॥ तत्र अत्रो ऽपि शब्दः प्रत्ययो न संभाव्यो ऽशब्द

B 4

स्य १ न १

प्रत्ययोरपि तस्य स्वरूपत्वादहंकर्तुश्चते... स्वरूपता स्वरूपे च ॥ अहंप्रत्ययः प्रत्ययी वा प्रवर्तते तदु
सर्थः ॥२४॥ आत्मनि प्रमाणप्रसक्त्यभावं च तस्य प्रतिषेधायोगाद ज्ञानप्रसंगाभावं चो निषिध्यते त
देकरूपसंहरति ॥ अहं कर्तास्मि निन्ये स्तु चैतन्यं कर्तृत्वादियत्र ॥ नेति नेति तितस्य नैसारं क
र्तृ निषिध्यते ॥२५॥ तत्त्वमस्यादिशास्त्रेणाध्यस्त दुःखित्वादि निषेधे पि कथमात्मसिद्धि
रित्याशंक्याह ॥ उपलब्धिः स्वयंज्योतिः दृष्टिः प्रसक्तस्य निषेधः ॥ साक्षात्सर्वान्तरः साक्षी चे
तो नित्यो गुणाद्वयः ॥२६॥ आत्मनोनुपलब्ध्यादिरूपत्वे प्रमाणप्रा वादुपलब्ध्यादि स्वभा

॥७२॥ ॥७२॥

वः सन्नसौ स्वतः सिध्यतीत्यर्थः ॥२६॥ आत्मात्मीयद्वयमहं ममप्रत्ययगोचरत्वेन प्रसिद्धमि
ति कथमात्मा स्वतः सिद्धः स्यादित्याशंक्याह ॥ सन्निधौ सर्वदा तस्य स्यात्तदाभासोपि मान
न तत्रा ॥ आत्मात्मीयद्वयं चातः स्यादहंममगोचरः ॥२७॥ अपि मानं कूटस्थाहंकारश्चैतन्यस
न्निधौ सति चैतन्यवदाभाति न तत्खलु तदविवेकादात्मात्मीयं चेतियेन अहं ममेति प्रत्यापत्ति
धियो गोचरः ॥ स्यादित्यनिर्विदात्मनः स्वतःसिद्धत्वे विरुध्यते सर्थः ॥२७॥ तथापि ग्राह्यप्रमेय

त्वादात्मनः स्वतः सिद्धिर्नास्तीत्याशंक्याह ॥ जातिकर्मादिमत्त्वाद्धि तस्मिन्शब्दाः स्युरंजसेति ॥ न
कश्चिद्वर्तते शब्दस्तदभावात्स्वमात्मनि ॥ २८ ॥ ६ ॥ विशिष्टस्य शब्दप्रमेयत्वेपि केवलात्मन
स्तदभावात्तस्य स्वतः सिद्धिरविरुद्धेत्यर्थः ॥ २८ ॥ स्वतः सिद्धे चिदात्मनि जातिगुणादिप्रवृत्ति
निमित्ताभावान्नो कश्चिदपि शब्दो वर्तते चेत्कथं तर्हि वेदान्तैर्वेद्यते साक्षादित्याशंक्याह ॥ आभासो

दध्युरित्यर्थः ॥ ५६

यत्र तत्रैव शब्दाः प्रत्यग्दृशिस्थिताः ॥ लक्षयेयुर्न साक्षात्तमभिदध्युः कथंचन ॥ [illegible]यत्रा
हंकारादौ चिदाभासो जायते तत्रैव स्थिताः शब्दाः प्रत्यगात्मदृगात्मानं लक्षयेयुर्न तु तं सा
क्षादभि[illegible]त्रे हेतुमाह ॥ न ह्यजात्यादिमान्कश्चिदर्थः शब्दैर्निरुच्यते ॥ आत्माभासा सा यतो

तप

हं ह्यदात्मशब्दैस्तथोच्यते ॥ ३० ॥ अहंकारादेरिव चिदात्मनः सद्द्वारेण वेदान्तैस्तात्पर्येण

ति ४

प्रतिपाद्यते ॥ न हि वस्तुमहंकारे लोके स्यात्मशब्दप्रयोगः स्यादित्याशंक्याह ॥ आत्मेति ॥ तच्चे
सोमवदित्यर्थः ॥ ३० ॥ आत्माभासापितरमादौ वर्तमानाः शब्दास्तत्साक्षिणं लक्षयन्ति न सा
क्षादभिदधतीत्यत्र हेतु[illegible]माह ॥ उल्मुकादौ यथाग्न्यर्थोः पराधीनाग्नेर्वाचकः सा ॥ यथो ल्मु

कं दहतीत्यादिप्रयोगेनेवोल्मुकादिग्राह्याः सा स्यादेयानोपयुज्यंते तेषां लोमीताघ्यर्थत्वात्
तथापि दहतीत्यनुपपत्या लक्षणया ग्यन्यर्थाः तयालक्षणोपासंकारादौ वर्तमानोऽस्मा
दादिग्राह्या ब्रह्मात्मप्रतिपत्यर्थो भवंतीत्यर्थः ॥ आत्माभासो यत्रेत्यत्रात्माभासः सिद्ध इति
नाभ्युपगतः तस्य वस्तुत्वमवस्तुत्वं वेती विभ्रायामनिर्वाच्यत्वं वक्तुं दृष्टांतमाह ॥ मुखादन्यो
मुखाभासो यथादर्शानुकारतः ॥ आभासास्मुखमप्येवमादर्शानुवर्तिनात ॥३१॥ ६०
मुखस्य मुखाभासस्य लक्षणस्य च प्रतीतितो भेदप्रसिद्धं मुकादार्शीतिकमाह ॥ अहंकृत्यात्मनि
भासो मुखाभासवदिष्यते ॥ मुखवत्स्मृत आत्मान्योऽविविक्तौ तौ तथैव च ॥३२॥ अहंकारे तत्का
रणे चाज्ञाने परमात्मनो य आभासो मुखाभासवत्प्रतिभासतोऽन्य इष्यते ॥ आत्माभासस्तदो
भयोपाधिप्रतिभासितत्वेऽपि वस्तुतो नास्मात्तिरिक्तं किंच चिदस्ति चिदात्मपरतंत्राज्ञानाद्य
निर्वाच्यं विद्यायां तत्कार्ये चाहंकारादौ प्रतिबिंबद्वारा तदेव चिदात्मतत्वमविद्यया संसरती
त्यर्थः ॥३२॥ स्वमतमेव द्रढयितुं मतांतरमाह ॥ संसारी चैक इत्येके आभासोऽयं स्वतंत्र इति ॥

॥७२॥

उपदे२३

सहस्रा

यस्त्वयाहं ह्याभासः प्रतिपादितः स एव संसारी जननमरणदुःखादिमानित्येवं मंस्यन्त
इत्यर्थः ॥ आभासस्यावस्तुत्वान्नैव चमोक्ष्यस्तत्वं युक्तमित्याशंक्याह ॥ वस्तुच्छायास्फु
तिरन्यस्मात्मुखादिविकाराणां ॥३३॥ आभासः छायेत्यनर्थान्तरं नाऽऽभासमेतत् कामतः छायामि
त्यादिवाक्यमात्रप्रमाणयति । सत्यैरिति ॥ अन्यस्मान्मुखादिच्छायायावस्तुत्वे कारणमस्ति
छायाया । मालिन्यस्य मुखमात्रेणोपलब्धेः सोपलब्धेश्छायायावस्तुत्वे साम्यादि
ति ॥३३॥ एकदेशिनां मतत्रयमाह ॥ जैवंदेशो विकारो वा तदंशो वा साभ्यतः परे ॥ ममैवोऽन्त्य इति स्म
तेः परमात्मैकदेशो जीवः संसारी लिंगस्य चैतन्यस्फुतिबलादिविकारो वा चैतन्यछाया
विशिष्टोऽहंकारो वा संसारीत्यर्थः ॥ माध्यमिकमतमाह ॥ अहं कलेव संसारी स्वतंत्र इति
केचन ॥३४॥ बौद्धानामिमतं मतांतरमाह ॥ अहंकारादिसंतानः संसारी न्यनान्वयी पृथक्
इत्येवं सौगता आहुः तत्रान्याख्यो विचार्यतां ॥३५॥ यथोक्तेषु संसारिविकल्पेषु कश्चिदन्य
तमः स्वपक्षया विकल्पः सौत्रियतामित्याशंक्यान्यनमस्याप्तिन्याय्याशाश्रावात्मायुक्त
तः सिद्धांतसिद्धिरिति संधायोक्तमन्तरेति ॥३५॥ पासंगिकीं संसारी चिंतां हित्वा प्रकृत

अ५

स्व२

र्माभासनिरूपणं प्रस्तौति ॥ संसारिणां कृपालवास्तां प्रकृतं तत्त्वमधुनोच्यते ॥ प्रकृतमात्माभासस्व
रूपमेव निरूपयन्नादौ मुखाभासं दृष्टान्तत्वेनापरमार्थतया प्रपादयति ॥ मुखाभासो य आदर्शे
धर्मो नान्यतरस्य सः ॥ यो यमादर्शे मुखाभासो दृश्यते स किं मुखादर्शयोरन्यतरस्य वस्त्वेकस्य किंस्विद्ध
र्मः किं वा मुखस्यैव धर्मः अथवा द्वयोरेव धर्मः यद्वा वस्त्वन्तरमिति विकल्प्य प्रथमपक्षासं
म्भवं प्रतिज्ञातं प्रपंचयति ॥ द्वयोरेकस्य चेद्धर्मो वियुक्तेऽन्यतरे भवेत् ॥३६॥ यद्यादर्शमुख
योः द्वयोर्यस्य कस्यचिदाभासो धर्मो विवक्षितो तदा मुखधर्मत्वे दर्पणादिविप्रकर्षेऽपि मुखे ॥७३॥
दृश्यमाने तद्धर्मरूपादिवदाभासो दृश्येत दर्पणधर्मत्वेऽपि मुखवियोगे दर्पणेऽभासमानो सत्या दि५
भासो भासेत ॥ न चैवमस्ति तस्मादन्यतरस्याभासो धर्मो यस्य कस्यचिदित्युक्तमिति सर्पः ॥ दि४
३६ ॥ ६४ ॥ कल्पान्तरमनुवदति ॥ मुखेन व्यपदेशात्स मुखस्यैवेति चेन्मैवं ॥ यद्यपि मुखा
भास इति मुखनाम्ना सो व्यपदिश्यते तथापि नाभासो मुखस्यैव धर्मो दर्पणानुवि तं२
धानात् मुखेन धर्मत्वेऽपि तद्योगात् किं च सत्यपि मुखदर्पणादिवियोगे नाभासो

७३॥

(143)

८६

भवतीति तत्समानत्वमुखस्यैवाभासो धर्मः स्यादित्ति दूषयति ॥ नादर्शानुविधानाच्च मुखे सत्य
प्यभावृतः ॥ ३७ ॥ कल्मान्तरमस्य प्रसारः ॥ हृद्योरैवेति चेत्तन्न हृद्योरैवाप्यदर्शनात् ॥ न हि मु
खदर्पणयोरपययोरप्यपि वियुक्तयोराभासो दृश्यते ॥ नापि संयुक्तयोरसौ चमेयियथा
कथंचन संयोगेपि तदुपलंभनासंभवादित्यर्थः ॥ आभासस्यैव स्वेतरत्वमिति पक्षा
न्तरं दृष्टान्तपूर्वकं समाकृते ॥ अरूपस्य सतो दृष्टिः स्याद्राहोश्चन्द्रसूर्ययोः ॥ ३८ ॥ यथे
हलोके सर्वेर्गतो रनुपलभ्यस्यापि राहोर्विद्यमानस्य दर्शनं चन्द्रमसि सूर्येचोपधौ
केदाचित्स्वेतत् ॥ एवमस्मादर्शयोर्विषयविषयिसंबंधोपाधावाभासस्यैव स्तुमत्तस्यै
वाप्ति व्याप्तेत्तिः स्यादित्यर्थः ॥ ३९ ॥ प्रागेव चन्द्रादिसंबंधाद्वस्तुत्वेन्यो तिः आरूत्रप्रामाण्यादे
वराहोरधिगतं प्रसक्ते चादर्शादिसंबंधोत्सर्वमर्थेवानुव्यतिरिक्तवस्तुनामुखाभासस्यकेन
चित्प्रमाणेनावगम्यतेरतिदूषयति ॥ राहोरप्रावेगोवस्तुत्वं सिद्धं शास्त्रप्रमाणतः ॥ किंच
मत्स्यादिप्रायेवराहुरित्येगी कारात्तदृष्टान्तेपि नास्ति संप्रतिपत्तिरित्याह ॥ छायापक्षेत्ववस्तु

(155)

तस्येति शिरोहोरस्ति ॥ मुखाभासोयं आदर्शादिस्यादिनोक्तं युक्तिं तत्र हेतुं करोति ॥ एवं तत्तत्र दृष्टान्तः
स्यावस्तुत्वान्मुखाभासो वस्तु परतो न प्रभवतीति भावः ॥ अपि नाक्रामेत्क्रामतः छायामित्यादि
स्यतेर्वस्तुत्वं छायायाः स्याच्चियुक्तमित्याशङ्क्याह ॥ छायाक्रान्ते त्रिविधोपि न तु वस्तुत्वसा
धकः ॥ ननु छायायाः लंघनप्रतिबंधपरमपि [illegible] वचनं तं [illegible] वस्तुत्वमिमिवाधुचिष्य — स्याः ४
स ५ — तिनेत्याह ॥ नह्यर्थान्तरनिरूढ[illegible]द्रा क्यं मर्यान्तरं वदेत् ॥ ६० ॥ वाक्यभेदप्रसङ्गादित्यर्थः ॥
६० ॥ यत्तु माधुर्यादिकार्यहेतुत्वेन वस्तुत्वं छायायाः सिध्यतीति तन्न दूषयति ॥ माधुर्या
॥७४॥ — दिच यत्कार्यमुष्मद्रव्यो[illegible]स्य वनोदरं ॥ छायायानेतद्दृष्टत्वाद्रूपामेव चद[illegible]नात् ॥ ६१ ॥ ध — ॥७४॥
घ ५- — आतपाध्वस्वनोदरं स्वेद[illegible]रोतापः प्रस्विन्नाः ससो माधुर्यं ओसपति भासं कुर्वतीत्यर्थः ॥
६१ ॥ दृष्टान्तनिष्ठमर्थं दृष्टान्तिके योजयति ॥ आभासा साम्यधीश्चैवं मुखाभासाश्रया यथा ॥ गम्यते
शास्त्रयुक्तिभ्यामाभासा सत्त्वमेव च ॥ ६२ ॥ यथा मुखं तदाभासस्तदाश्रयश्चेत्येते त्रयवस्तार
[illegible]तो विभक्ताभासं तेन तथैवात्मा तदाभासस्तदाश्रयश्चेत्येते मिथो विलक्षणं शास्त्रयुक्तिभ्यां

रु४

गम्यते॥ एकोदेवः सर्वभूतेषु गूढ इत्यादि शास्त्राद्बुध्यादेर्विषयांतरस्यागमापायित्वेनानित्यसि
द्धसाक्ष्यात्मव्यतिरेकेण स्फुरणानुपपत्तेरितियुक्तेश्चात्मास्तित्वं सिद्धं। अग्निर्यथैकोभुव
नं प्रविष्ट इत्यादि शास्त्रात्कुरस्यासंगाद्वितीयात्मनो विद्यानतत्कार्यसंपर्कानुपपत्तेः
सुखदुःखाद्यनुभवासिद्धावज्ञानादात्माभासाभ्युपगमे तदविवेकादज्ञानतत्कार्य
संस्पर्शो भ्रमसिद्धः सुखदुःखाद्यनुभवसिद्धिरित्येवमात्मकयुक्तेश्चात्माभासास्ति
त्वं सिध्यति॥ अव्यक्तात्पुरुषः परः अक्षरात्परतः परः इत्यादि [illegible] शास्त्रादसंगवादि
केषु स्वात्मनः साक्षाद्दाकाशादिरूपेण परिणामायोगात् नाद्यनिर्वचनीयं किंचिदज्ञा
नं तदुपाधिभूतमभ्युपगंतव्यमिति युक्तेश्चात्माभासाश्रयानिर्वाच्यताज्ञानेप्योक्तेष्वः स
मुत्पाद्यतान्येवानुविनश्यतीति श्रुतेरागमापायित्वयुक्तेश्चाभासासत्वं प्रतिपादितं। ब्रह्म
वेद इत्यादिश्रुतेर्जीवब्रह्मैक्ययुक्तेश्च ज्ञानादेस्तत्त्रयस्याप्यसत्वं निश्चितमिति च शास्त्रार्थः।
एवमात्मानात्माभासस्तत्त्रयस्येति त्रितयमुक्तलक्षणं सिद्धमित्यर्थः॥४२॥ ॥छ॥ ॥छ॥

146

॥७५॥

संसारमोक्षसिद्ध्यर्थमात्मात्माभासाश्रयात्वयोक्तौ तैर्नैषामेकस्यापि संसारमोक्षौ युक्तावितिउं
क्ते॥ नह्यंतरविकारत्वादाभासस्याप्यनस्तुतः॥ नाचितिश्चादरं कर्तुं कस्य संसारि
ता भवेत्॥४३॥ विचार्यमाणे संसारस्यवस्तुत्वासंभवात्॥ आत्मन्यविद्यामात्रः संसारः
स्यादित्युत्तरमाह॥ अविद्यामात्रएवातः संसारोऽस्त्वविवेकतः॥ कूटस्थस्यात्मनानित्यमा
त्मा वा नात्मनोवसः॥४४॥ त्रयाणामविवेकाद्वस्तुत्वानुपपत्तेरात्मसत्तयासत्तावानात्म
न्यवाविद्यायाः संसारो भवतीत्यत्राशंक्य दृष्टांतेन स्पष्टयति॥ रज्जुसर्पधियारज्जो
र्यात्मनः प्राग्विवेकतः॥ अवस्तुः सन्नपि द्वेषकूटस्थात्मनात्मना तथा॥४५॥ कल्पनाया
लाघवमाश्रित्य चोदयति॥ आत्माभासाश्रयाश्चात्मा प्रत्ययैः स्वैर्विकारवान्॥ सुखी दुःखी
च संसारी नित्य एवेति केचन॥४६॥ योऽपि वर्णोऽभासाश्रयोऽप्युपगमः सयावात्मसस्मापि
रप्युपगम्यते चरोपद्वान्ततोऽन्य आत्माऽऽभा× आ× सस्य नास्तीत्यर्थः॥ एवकाराच्चे
कारः॥४६॥ नात्रागमोऽस्त्यतोऽस्तीति न लाघवमपि स्वासे ह्यामान्नमेतदित्युत्तरमाह॥

॥७५॥

आभासाभासापरिज्ञानाद्याध्यासेन विमोहिताः ॥ अहंकर्तारि मामेति मन्यंते ते निरागमाः ॥४७॥
आभासपरमार्थस्य सत्तदाभासो मिथ्येति याथात्म्येन यथावस्थितस्वरूपेणापरिज्ञानाद्विमो
हिताः ॥ श्रुतिसंप्रदायरहित्यास्ते स्वोत्प्रेक्षया प्रमाण्यंतीत्यर्थः ॥४७॥ परपक्षे मोक्षोपि दुर्लभः स्या
दित्याह ॥ संसारो वस्तु सत्ते षां कर्तृ[illegible]भोक्तृत्वलक्षणः ॥ आभासाभासाश्रयाज्ञानात्संसारो वि
वेकतः ॥४८॥ स्वपक्षे ×स× पुनराभासाश्रयाद्युपगमे त्रयाणामविवेकद्वारेण बंधस्तद्विवेक
न मोक्षश्चेत्याह ॥ आभासाभासेति ॥४८॥ आभासाभासाश्रयाविवेकद्वारा बंधस्तद्विवेकद्वारा मोक्ष
श्चेत्यर्थः ॥ इदानीमात्माभासाद्युपगमे ×आ× लोकांतरमाह ॥ चैतन्याभासला बुद्ध्यात्मनस्तु
स्वरूपता ॥ स्याच्चेत्तज्ज्ञानरूपेण वेदशास्त्री तियुज्यते ॥४९॥ आभासाभासायां बुद्धेर्गृहीतस
बंधेर्ज्ञानानंदादिरूपेण साम्ना न वेदा लक्षणया बोधयंतीत्युपगमाद्दात्माभासोनाप
लापमर्हतीत्यर्थः ॥४९॥ तथापि आनास्वगच्छतीत्यादिरूपेण गम्यत्वमात्मनो न सिध्यती
ति शंकते ॥ प्रवृत्तिप्रसयार्थी योपि नावेकाश्रयो यथा ॥ करोति गच्छतीत्यादौ दृष्टो लोके प्रसि
द्धितः ॥५०॥ प्रवृत्त्यर्थः क्रियाप्रसयार्थः कर्तृकर्मत्वं तयोरेकाश्रयत्वं यथा दृष्टं तथासिध्याश्रयत्वमि

पि किं न स्यादित्याशंक्याह ॥ नाद्धनयोर्ध्योमयत्वं तु नोर्ध्वदृष्टं स्मृतौ तथा ॥ जानात्यर्थेषु कोऽहेतुर्ना
श्रयत्वं निगद्यतां ॥५१॥ जानाति श्रुतिमूर्धेपि वांजानात्यवगच्छतीत्यादीनां तेषु आश्रयत्वे हेतु
र्नास्तीत्यर्थः ॥५१॥ किं प्रकृतिप्रत्ययार्थयोराश्रयत्वमात्रं नास्तीति चोद्यते ॥ किं वा परमार्थत
स्तयोराश्रयत्वं नास्तीति तत्र प्रथमं प्रत्याह ॥ आत्माभासस्तु तिङ्कर्त्रा व्योघात्यर्थश्च धियः क्रि
या ॥ उभयं चाविवेकेन जानातीत्युच्यते मृषा ॥५२॥ आत्माभासो बुद्धिश्च सत्ययुपरमार्थीत्मा
विवेकेन जानातीत्यादिशब्देन मृषैवोच्यते तस्मादज्ञानद्वारेण प्रकृतिप्रत्ययार्थयोराश्रयत्व
प्रसिद्धिरविरुद्धेत्यर्थः ॥५२॥ द्वितीयमंगीकरोति ॥ न बुद्धेरवबोधोऽस्ति नात्मनो विद्यते क्रिया ॥ अतो ना
न्यतरस्यापि जानातीति च युज्यते ॥५३॥ निरूप्यमाणे जानात्यवगच्छतीत्यादिप्रयोगो यथा न घटते
तथा नित्यं ज्ञानमितिभावव्युत्पत्त्या आत्मनि ज्ञानशब्दप्रयोगोऽपि न संभवतीत्याह ॥ नाप्यतो भावश
ब्देन ज्ञप्तिरित्यपि युज्यते ॥ न ह्यात्मा विक्रियामात्रो नित्य आत्मेति शासनात् ॥५४॥ भावो नाम धा
त्वर्थसामान्यं पचतीत्यादिवत् न चात्मा तद्रूपः परतन्त्रप्रसंगात् अतो नात्मनि भावव्युत्पत्त्या ज्ञानश
ब्दोपपत्तिरित्यर्थः ॥५४॥ करणव्युत्पत्त्यापि ज्ञानशब्दस्यात्मनि प्रवृत्तिं प्रत्याह ॥ न बुद्धेर्बुद्धिवाच्य

त्मा

त्वं करणं न स्वं कर्तृकं ॥ नापि ज्ञायत इत्येवं कर्मशब्दैर्निरूप्यते ॥५५॥ बुद्धेरन्तःकरणस्य बुद्धिशब्द
पर्यायज्ञानशब्दवाच्यत्वं करणव्युत्पत्त्या कथंचिदुपपद्यते न तु आत्मनस्तद्युज्यते न हि करणमक
र्तृकमस्ति तथा चात्मनश्चेत्करणत्वं कर्त्रन्तरमेष्टव्यमिति अनिष्टमापद्यतेत्यर्थः ॥ कर्मव्युत्पत्त्यापि
ज्ञानादिशब्दस्यात्मनि प्रयोगो न सिद्ध्यतीत्याह ॥ नापीति ॥ कर्तृकरणभावे तद्रूपे स्वकर्मक
त्वस्यापि वक्तुमशक्यत्वादित्यर्थः ॥५५॥ तथापि सर्वमेतत्तुल्यमित्याशङ्क्याह ॥ न येषामे
क एवात्मा निर्दुःखोऽविक्रियः सदा ॥ तेषां स्याच्छब्दवाच्यत्वं ज्ञेयत्वं चात्मनः सदा ॥५६॥ आ
त्माभासाश्रयाविवेकेन शब्दवाच्यत्वादि स्वपक्षे सिद्ध्यतीति सत्त्वान्न सिद्धान्ते कश्चिद्दोषो
ऽस्तीत्यर्थः ॥५६॥ आत्माभासाश्रयाविवेकमतेऽरणापि शब्दप्रवृत्तिरात्मन्यविरुद्धेति भट्टादिमतं दर्श
यति ॥ यदाहंकर्तुरात्मत्वं तदा शब्दार्थमुख्यता ॥ अहंकर्तुरात्मत्वं यदि [illegible] सादात्मनश्चेतद्धातिस्यस्यो
तोऽसिद्धत्वात्तस्यामिथ्यात्वविलक्षणत्वान्नाहंकर्तुरात्मेति तिपरिहरति ॥ नाज्ञानायामिमत्वात्तु श्रुतौ तस्यात्म
लुप्यते ॥५७॥ मुख्याभावे गौणोऽपि शब्दार्थो न स्यादित्याशङ्क्याह ॥ न तु हि न मुख्यार्थो नापि गौणः कथं च न
जानातीत्यादिशब्दस्य गतिर्व्याख्यात पापितु ॥५८॥ कस्मात् जानातीत्यादिशब्दस्य वाच्यं गतिरित्या

म४ व१

था १ प्र २

ज्ञोक्या न्यथा वेदस्याप्राप्त प्रसंगादित्यासः॥ज्ञाश्च नामयं थत्ते वेदस्याप्यप्रमाणता॥सा चेनेष्टा वतोन्या गतिरस्य प्रसिद्धितः॥५॥प्रसिद्ध्येव गतिः श्रीयते चक्षिप्रादर्लं सिद्धा कं नापाणि न्यादि प्रसिद्धया साश्रयितव्या॥नाधास्या हा प्रसिद्धिर्मृष्ट लोकस्य यद्विरोधानिरासता॥लोकायतिक सिद्धांतः सचानिष्टः प्रसज्यते॥६०॥४॥ द्वितीयं प्रत्याह॥अपि युक्तं प्रसिद्धिश्च सर्ववद्धनिबंधना॥बुद्धेरोस्मनोरा दुर्विवेकं चेलत्वात्त्वतो हि गतिरन्यमेवतेहुरावृदिष्यतिनेत्याह॥गतिरन्यनवेदो यं प्रेमाणं सत्वदस्कृतः॥६१॥चिदात्मेनि औपाधिको नो जीती त्यादि त्राष्ट्र प्रयोगदर्शी गीवृत्सा सिद्धोति दृष्ट

॥७७॥ क्रमसं १

तमाह॥आदर्श मुख सामान्यं मुखस्यापि हि मानवे॥आदर्श यन्मुखं तेन सामान्यमेकत्वं बसिस्थितस्य मुखस्यापि दर्व्यत रोसाद नानुपपत्तेर्मदीयमेवेदं मुखमिति प्रसिद्धि ज्ञानाच्चेत्यर्थः॥उक्तमेव मुपपादयति॥मुखस्य प्रतिबिंबो हि मुखाकारेण दृश्यते॥६२॥कल्पितमुखस्य परमार्थमुखस्य चान्योन्यमविवेकादितरेतरे धर्माध्यारोपणान्मुखं मलिनमल्पं वेलं चलतीत्यादि व्यपदेशा व दासन्यपि सर्वमुपपन्नमिति दार्ष्टांतिकमाह॥यत्राप्यस्याव भासस्तु तयोरे वाविवेकतः॥जीनोतीति क्रियासर्वा नो कायति स्वभावतः॥६३॥अवभासो नाम आभासः प्रतिबिंबभावेः॥ल दारणा मा

॥७८॥ क्रं

॥६३॥

नात्मनोरन्योन्यधर्माध्यासेन जानातीत्यादिव्यपदेशो भवतीत्युक्तमेव स्पष्टयति॥ बुद्धेः चैतन्यत्वमध्य
स्य जानातीति ज्ञ उच्यते॥ तथा चैतन्यमध्यस्य ज्ञत्वं बुद्धेरिहोच्यते॥ ६४॥ ननु ज्ञानं बुद्ध्यादि किमात्म
संबंधित्वेन क्रियते। कथमुच्यते चैतन्यमात्मस्वरूपं बुद्धावापरोप्यत इति तत्राह॥ स्वरूपं चात्म
नो ज्ञानं नित्यं ज्योतिःश्रुतेर्यतः॥ न बुद्ध्या क्रियते तस्मादात्मनान्येन वा सदा॥ ६५॥ बुद्ध्यात्मनो
रन्योन्यधर्माध्यासेन व्यवहारं दृष्टांतमाह॥ देहं प्रत्ययो यद्वज्जानातीति च लौकिकाः॥ वद
६९ ति ज्ञानकर्तृत्वं तद्वद्देहधर्मात्मनः॥ ६६॥ अहंप्रत्ययः प्रायोग्ये देहे घटादितुल्ये मनुष्योऽहमित्य त्वे ५
हंप्रत्ययो यथा दृश्यते तथा बुद्धेः कर्तृत्वेनात्मस्वायोग्येपि चिदाभासव्याप्त्या ज्ञातृत्वमारोप्य
जानातीति लौकिका व्यवहरंति तथात्म[illegible]। नो विकारव्यवहारस्य दृष्टत्वान्निकारित्वात्तावि
वेकाहि[illegible]कारित्वादिव्यपदेशसिद्धिरित्यर्थः॥ ६७॥ ननु तार्किका ज्ञानस्योत्पत्तिविनाशौ
प्रपश्यतो ज्ञानं क्रियत इत्याहुः॥ तन्नो नित्यज्ञानमात्मस्वरूपमित्युक्तं तत्राह॥ बौद्धः प्रत्ययरूपे न
क्रियते मायो[illegible]स्वचिन्निर्मितः॥ मोहिताः क्रियते ज्ञानमित्याहुस्तार्किका जनाः॥ ६८॥ छ॥ छ॥

ज्ञानेजन्मविनाशप्रतिभासस्योपाधिकं चाज्ञस्वरूपेणाङ्गीक्रियमाणेतेस्यर्थः॥६७॥ आदर्शमुखसा
मान्यमित्यादिना॥ मानामनोराभासबुद्धौरूपाविवेकाज्जानातीत्यादिव्यवहारमुपपाद्यप्रसक्तानुप्र
सक्तं च परिहृत्य प्रकृतमुपसंहरति॥ तस्माद् [illegible] भासबुद्धौ नाम विवेकासवर्तिताः॥ जानातीत्या
दिशब्दस्य प्रत्ययो यो वाच्यत्वमृच्छति॥६८॥ यथोक्तशब्दस्तदनंतरभाविलदर्थप्रत्ययस्तच्छुसा
रिणीति त्रैनार्थे [illegible]स्मृतिश्चेत्यैतत्सर्वे स्य्यवहाराः यथोक्ताविवेकाद्धताराविस्यर्थः॥ ज्ञाभासबु
द्धिनामविवेकमूलः सर्वो व्यवहारइति उक्तमेवदृष्टान्तेन स्पष्टयति॥ आदर्शानुविधायित्वच्छाया
या अस्यतेमुखे॥ बुद्धिधर्मानुकारित्वं ज्ञाभासस्य तथेष्यते॥७०॥ छायायेत्याभासो निर्दिश्य
ते। अस्यते समारोप्यते इत्यर्थः॥ यथा आदर्शानुविधायित्वं प्रतिबिंबद्वारा मुखे अध्यस्यते
तथा चित्प्रतिबिंबद्वारात्मन्यध्यस्यते इत्यर्थः॥७०॥ यस्मात् चिदाभासाविता बुद्धिस्तस्मात्तस्य
रिणा [illegible] मेषु यारूढत्वप्रतिभाससिद्धिरित्याह॥ बुद्धेस्तु प्रत्ययान्तस्मादाभासेन दीपिताः॥
मारूकास्वभासं लेढ हन्तीवान्मुकादयः॥७१॥

॥शिव॥ ॥७८॥ ॥राम॥ ॥७८॥

बुद्ध्यादिराभासनत्वात्सपरिणामानामपि चिदाभासवत्वात्स्मार्तकत्वधीरित्स्फुरत्तमजानंतः स्वोक्ते
क्षणमात्रमनुसरंतो बौद्धा विरुद्धं वदंतीत्याह ॥ स्वयमेवावभासंतेत्याहकः स्वयमेव चाहमित्येवमाह
कोस्तित्वं प्रतिषेधतीति सौगताः ॥ ७२ ॥ बुद्धो बुद्धिवृत्तिषु चाभासस्य विद्यमानत्वात्तद्विवेकं निबंध न३
नाप्रमाणो बौद्धानामित्येवमेतन्नोद्यपरिहर्तुं आक्यं नान्यपेक्ष्यमित्रेत्य ■ स्वयंप्रकाश्यापेक्षतीति ॥ यद्येवं
नान्यद्रष्ट्रयास्ते किं तद्धारणमुच्यतां ॥ भावाभावो वा स्तितेषां येनान्यगाद्यो सरायहि ॥ ७३ ॥ ध ॥
अन्यपीग्राहकस्तेषामित्यतरत्पितसमं ॥ नान्येन साक्षिणा द्रष्ट्रयास्तप्रसयाभवेसुरित्येवं यदि बौद्धाव
दंति तर्हि किं तेषां निवारणमित्युच्यतामिस्कार्वे स्वयंप्रख्या ब्रुते भावेति ॥ तेषां प्रत्ययानां जन्म
ण३ विनाशौ न सद्द्रासास्विवेद्यो किंतु साहमितिप्रत्ययविज्ञासिद्धः स्पष्टा पीग्राहकोस्ति तावता बौ
द्धमतापावरमिति यदि मतमित्यर्थं दूषयति ॥ तदपीति ॥ अविनितत्वस्य लुल्यत्वाद्य स्वि
नग्राहकसति ॥ ७४ ॥ तत्र यपीति ग्राहकरूपमपि प्रत्ययं समञ्जडं ततो न भावाभावसिद्धिरि
त्यर्थः ॥ ७४ ॥ अतिरिक्त साक्षि एव सति भावाभावसिद्धिर्नास्ति चेत्तर्हि विनेनाभासं ■

का२

साक्षिसान्निध्यादेव भावाभावयोः सिद्धिर्भवतीति शंकते॥ अध्यस्तस्य समीपे तु सिद्धिः स्यादिति चे
न्मतं॥ नाध्यस्तानुपरक्तत्वादन्यत्रापि प्रसंगतः॥ ७५॥ परिहरति नेत्यादिना॥ अहंकारोदानध्यस्त
ल्पो३ चैतन्यस्यानुपकारिसंभासोरस्याहेतुत्वादन्यत्रापि काष्ठलोष्टादौ सन्निधानाविशेषणासिद्धि
प्रसंगान्न संधिमात्रेणासिद्धिरित्यर्थः॥ ७५॥ आत्माभासानुपगमे बौद्धादिदोषपरिहारासंप
त्रि४ त्तिमुक्त्वा शास्त्रीयो बंधमोक्षव्यवहारोपि निरस्तु मस्ताध्यस्यवादिनो न सिद्धतीति वक्तुं
॥७प्री विकल्पयति॥ अर्थी दुःखी च यः श्रोता स चाध्यस्तो [illegible]नतरः॥ दुःखित्वेन मोक्षार्थित्वेन च प्रसिद्धः॥ ७६ ॥७ाणि
श्रोते वाध्यस्तो विवक्षितः॥ किं वा तयोः मिथ्याभेदोस्तीति [illegible]न्यः॥ प्रथमपक्षं प्रत्याह॥ अध्यस्त
स्य च दुःखित्वं अर्थित्वं च न ते मतं॥ ७६॥ आभासानंगीकारात्तद्द्वारेण विघातकार्यसंभवा विकप
त्सिद्धः॥ नाध्यस्तस्य दुःखदुःखित्वादि सिद्धिरित्यर्थः॥ ७६॥ द्वितीये दूषयति॥ कर्ताध्यस्तः स
क्ष३ दस्मीति नैव संज्ञू रमहे ते॥ श्रोतुरध्यस्तस्य [illegible]न चैकत्वे भान्तत्वादि युक्तः श्रोताज्ज
त्वाच्चैतनो ध्यक्षाद् हं सत्ब्रह्मास्मीति संज्ञू हं नैवाहतीत्यर्थः॥ पुनश्च दोषांतरमाह॥ ध॥

च२

153

२१

सर्वेदो वासीति मिथ्याक्तिः श्रुतेरपि न युज्यते ॥ ७७ ॥ चिदाभासान्त्युपगमेवं धमोक्षौ ■वतारानुपपत्तिमेवमुक्त्वा स्वपक्षे तदुपपत्तिमाह ॥ अविविच्योभयं वक्ति श्रुतिस्त्वे स्या ॥ त्वं रूपस्तथा ॥ आत्मानात्मरूपमुभयमाभासद्वारेण विवेकापन्नं कृत्वाय थाप्राप्तमर्थित्वात् कृपादाय श्रुतिस्तत्त्वमसीति तादात्म्यं वक्ति चेत्तथा सतिसम्यगहं ब्रह्मास्मीति गदः स्यात् ॥ चिदात्मनः स्वतो ब्रह्मत्वादतो ब्रह्मज्ञानादविद्यो■कार्य निराकृते तेः राभासकृता विवेकादिभावात् बंधमोक्षव्यवहार सिद्धिरित्यर्थः ॥ सांख्यादिपक्षमनुभाष्य प्रतिक्षिपति ॥ ७८ ॥ अस्मद्युष्मद्विविन्येव त्वः

७२

मेवेतिवदेद्यदि ॥७६॥ प्रत्ययान्वयि निष्ठत्वमुक्तदोषः प्रसज्यते ॥ साक्षिणो मुं

ञ्जादिवेषिकां निःकृष्यकेवलमहंकर्तारं त्वमेव ब्रह्मेति श्रुतिद्वारेणाचा

र्यो यदि ब्रूयात्तदा तत्त्वमसि श्रुतेरहंकारनिष्ठत्वान्मिथ्यावादित्वमुक्तदो

षः स्यादित्यर्थः ॥७६॥ प्रत्ययान्वयिनिष्ठत्वमुक्तदोषः प्रसज्यते ॥ साक्षिणो मुंजादीवेषीका

निःकृष्य केवलमहंकर्तारं त्वमेव ब्रह्मेति श्रुतिद्वारेणाचार्यो यदि ब्रूयात्तदा तत्त्वमसिश्रुतेरहंकारनिष्ठ

त्वान्मिथ्यावादित्वमुक्तदोषः स्यादित्यर्थः ॥७८॥ अहंकर्तृत्वविषयो स्यात्पदे स्याद्लक्ष्यलक्षणं भवति

त्वं शब्देनाहंकर्तृविषयेण च्यलक्ष्यस्य लक्षणमाणात्वादितिरावतो ॥ त्वमित्यध्यक्षमिष्टभेदह

मध्यक्षयोः कथं ॥७९॥ सांबधोवा भवेत्तेन त्वमिति लक्षयेत् ॥ अहंकाराध्य

क्षयोः संबंधाभावान्नाहंकारनिष्ठेन शब्देनाध्यक्षस्य लक्षणत्वमिति लक्षय

॥८०॥

॥८०॥

यं

दृश्या

ति। अहमिति॥ अहंकारस्यैव ममाध्यक्षस्य दृष्टृत्वमिति संबंधमाशंक्याध्यक्षस्य कूटस्थत्वान्ने
त्यभिप्रायाह॥ द्रष्टृदृश्ययोरेव संबंधो यद्यध्यक्षेणि त्रिपोक्त्य॥८०॥ संबंधांतरमाशंकते॥ अत्रियत्वेपिता
दात्म्यमध्यक्षस्य केवबोधेर्दि॥ यत्र तु क्लोपटस्यादौ तादात्म्यं तत्र पटस्य तंतो कस्य मित्यादि संबंधग्रहणा
द्दृष्टे॥ तथा मम अहं वर्तुरात्माध्यक्षोस्तीति संबंधग्रहणेन तादात्म्यधीर्न संभवतीत्याह॥ आत्माध्य
क्षो मम मास्तीति संबंधाग्रहणेन धीः॥८१॥ एवत आत्मांतरहृदये यो यानी सादिश्य स्वाद्रष्टेकाराध्यक्ष
योः संबंधः सिध्यतीतिशंकते॥ संबंधग्रहणं स्यादिति चेन्मन्यसेन हि॥ पर्वोक्तोः स्युः स्त्रिधादो
षाग्रहो वा स्यान्ममेति चे॥८२॥ परिहरति॥ नहीति॥ अध्यक्षस्य संबंधग्रहणेन युज्यते नु विकार
त्वान्नाहंकारस्य जडत्वाज्जडं प्रति स्तुतेर्वैचक्रत्वमपि न युक्तमिति त्रिधा दोषाः स्युरित्यर्थः॥ संबंध
ग्रहेपि ममाध्यक्षोस्तीति संबंधग्रहः स्यात् न त्वहमध्यक्ष एवेति ग्रहो युक्तः सोपि न स्याज्जडत्वादि
त्याह॥ ममहोवेति॥८३॥ आत्मानात्मनोः संबंधासिद्धिं परमते दर्शयित्वा स्वमते मिथ्या तादात्म्यं द
र्शयति॥ अहद्रिति दृशिरूपेणाभाति बुद्धिर्यदा तदा॥ प्रत्याया अपितत्स्याः स्युस्तत्क्षायोविस्फुलिंगव
त्॥८४॥ बुद्धेर्बुद्धिरहा ज्ञानी चेतन्याभासेवत्वे लौकिकवैदिकसर्वव्यवहारसिद्धिरित्याह॥ श्री

सी२   द्रु१ श्रु१

भासस्तदभावश्च हेतोः। साम्येन चान्यथा। लोकस्य युक्तितः स्यातां तां [illegible] तथा सति ॥८४॥
भावाभावयोर्युगपद्विरोधित्वात् हेतोः [illegible]म् सकाशात्तु लोकस्याभासतदभावौ नैव चिदाभासमंतरेण युक्तितः
स्यातां चैतन्यस्य निःसंगेन भावाभावायोगात् तस्माच्चैतन्याभासाभ्युपगमस्फुरणास्फुरणे साक्षिणा
सिध्यतः नान्ये येऽस्यात्माभासः स्वीकर्तव्य इत्यर्थः। किंच तत्त्वमसीवाक्यात् तस्मात्मनो ब्रह्मास्मीति
यहोबुद्धे[illegible]दाभासवत्वे सत्येव घटते। तदा रोगो वा पदेशोपपत्तेः तोपि चिदाभासोऽभ्युपेयः स्यात्।
तदुक्तं श्वेति॥८४॥ नन्वायो विस्फुलिंगवद्विसृत्तत्यारा[illegible]त्मनि विकारप्राप्तिरिति शंकते॥ नन्वेवं हि स्फु
संक्रांतिरयःपिंडेऽग्निवत्स्वतो॥ आर इति। बिंबितस्य मुखाभासस्य यथा मिथ्यात्वेन पातं चे
तन्ये मिथ्यावबुध्यात्मनिष्ठत्वेनाभासातीत्यानैवेवतत्प्रोग्रानिराकृतमित्यर्थः॥ मुखाभासवदित्येत
त दृष्टांतं निराचष्टे॥८५॥ दृष्टांतस्य सर्वांशारूपत्वाद्दार्ष्टांतिकस्यापि तथात्वं स्यादित्याशंक्य
कस्यचिदेवांशस्य दृष्टांतत्वेन विवक्षितत्वान्नैवमित्याह॥ दृष्टांते मा यो रोहितामासमित्यतः दृष्टमुच्य
ते॥ दृष्टांतेन दृष्टांतो गर्भे[illegible]तो संक्रमणादिदृष्टांतत निविष्टं दार्ष्टांतिके कस्मान्न गृह्यते तत्राह॥
दृष्टं दृष्टांततुल्यत्वं न तु सर्वात्मना क्वचित्॥८६॥ दृष्टांते विवक्षितमंशमुपन्यस्य दार्ष्टांति

॥८१॥   म   ॥८॥

दा१

केपि तथाविधमंशं दर्शयति ॥ तथैव चेतनाभासं चित्तं निरस्यंश्चयम् ८२ वेत्त ॥ हृद्यस्याप्यसोग्निव्याप्या
रोहितस्य प्रसस्य यवदन्तः कारणं तद्विकारजातं चाचेतनमपि चैतन्यव्याप्त्या चेतनवद्भातीत्यर्थः ।
किं चोदर्शे मुखाभासो यथा मुखेस्फुरन्तं तथात्माभासोपि मिथ्याप्रवैमेवोक्तः ॥ तस्मादात्मा
भासस्य मिथ्यात्वादपि न कूटस्थस्य विरोधो दर्शे हि साक्षात् ॥ मुखाभासो यथादर्शे आभासख्यापि
तोमृषा ॥ ८७ ॥ आत्माभाससद्द्वारेण जडमिति चित्तस्यैतै चैतन्यत्वमुच्यते ॥ स्थूलस्तस्य चेतनत्वं किं नस्या
त्तदाह ॥ चित्तं चेतनमित्येतत्तत्र स्वयुक्तिविवर्जितं ॥ किं च देहस्यस्यापि चित्तस्य स्थूलश्चेतनत्वे देहस्या
पि देहादेः चिद्रूपत्वप्रसक्तिरित्यति प्रसक्तिपरंपरां दर्शयति ॥ देहस्यापि प्रसंगः स्याच्चक्षुरा
देस्तथैव च ॥ ८८ ॥ देहात्मापत्तिमात्राक्य निरस्यति ॥ तदप्यस्त्विति चेत्तन्न लोकायतिकसंगतेः ।
अतस्माच्चेतनस्येव चित्तस्याचेतनाभासत्वमास्थेयं ॥ अन्येषाद्दारामावादत्रैवस्मास्मि
ति आगन्तुकधीनं सिद्धे हि स्यात् ॥ न च धीर्हि त्विहास्मीति यद्याभासो न तच्चेतेद्धि ॥ ८९ ॥
अहमस्मीति धियो भावेनाक्रान्तिस्तत्राह ॥ सदस्मीति धियो भावे व्यर्थस्यात्तत्वमस्य

160

॥ ८९ ॥

पि। सार्थकं चेदिदं नास्यं किमिति तर्हि सर्वोपि सदिति ज्ञस्यास्मीति न प्रतिपद्येत तत्राह ॥ युष्म
दस्मद्विवेकज्ञे स्यादर्थवदिदं वचः ॥ ५० ॥ तमेव युष्मदस्मद्विवेकं दर्शयितुं आत्मानात्म
त्मविषयाणां प्रत्ययानां विषयानुक्तानां तद्विषयाणां गुणप्रधानभावे विशेषणविशेष्यभावं दर्श
यति ॥ ममेदं प्रत्यययोर्ज्ञेयो युष्मद्येव न संशयः ॥ अहमित्यस्मदीयः स्यादयमस्मीति चो
भयोः ॥ ५१ ॥ अस्मदर्थस्य युष्मदर्थस्य प्रधानगुणाभावोऽदृष्यंते विशेषणविशेष्यत्वं
क्वचिद्युष्मदर्थस्य विशेषणत्वमस्मदर्थस्य विशेष्यत्वं क्वचिदस्मदर्थस्य विशेषणत्वं यु
ष्मदर्थस्य विशेष्यत्वं तद्द्वयं गृहीतव्यं युक्तितः ॥ यस्मादन्यथा व्यवहारो नोपपद्येत
तस्मादेवमेव युष्मदस्मदोः प्रधानगुणभावादिरूपकं तद्व्यभिसंधेः ॥ एवमु
क्तानां सुध्येविशेषणविशेष्यत्वं न स्यादनुपपत्ति ॥ ममेदं हृदयमिति ममेदं प्रत्यया
त्प्रतिभासोऽज्ञेयो युष्मद्येव अनात्मार्थ एव तयोरनात्मविषयत्वेन संशयः ॥ अहमि

च३

॥ ८९ ॥

तिय: प्रत्यय: सोस्म्यात्मनि आत्मनोऽर्थे मिथैतस्य इदमस्मीतिय: स उभयोरनात्मा।सा
त्मनोर्गुणप्रधानभावेन वर्तमानयो: स्यादिवमात्मानात्म विषयाणां प्रत्ययानां विषयानुरक्तां तद्विषय
तां गुणप्रधान [struck through] स्यादिवभावमाह। अन्योन्येति परस्परापेक्षया तेषां प्रत्ययानां व्यवहार
भुमौ प्रधानगुणतात्पर्यादनात्मार्थस्य प्राधान्येन कथं युष्मदस्मद्विवेकइत्यपेक्षायामाह। ममेदमिति। अ
न्योन्यापेक्षया तेषां प्रधानगुणतेष्यते॥७॥ विशेषणविशेष्यत्वेन तथा ग्राह्यं हि मुक्तितः॥१२॥ ममेदमि
त्यादिना विशेषणविशेष्य संयुक्तितोऽग्राह्य मित्युक्तमेव व्यक्तीकरोति। ७। ममेदं द्वयमप्येतन्मध्य
मस्य विशेषणं। मध्यमस्यात्मनो देहं तरस्यावस्थेदं ममेदमिति द्वयमपि पत्र दृष्टांत
माह॥७॥ धनी गोमान्यथा तद्वद्देहोऽहं कर्तुरि [illegible] च॥१३॥ यथा धनादिदेह। तरस्य विशेष
णं तथा देह: स्थूलोऽहं कर्तुर्विशेषणमित्याह। तद्वदिति। ७। अहं कर्तस्य हितं स
र्वमिव बाह्यं वस्तु तत्रोध्यारोपितं सर्वदा साक्षिणो विशेषणं साक्षित्वस्य बुध्या।

विशेषणत्वं २

॥ ६३ ॥ वे ५

दिसाक्ष्यार्थेप्रयुक्तं चादित्याह ॥ बुध्यारूढं सदा सर्वं सारं कर्त्रे च साक्षिणा ॥ यस्मादरं कर्त्रीस
स्सर्वस्य साक्ष्यस्यैतौ दात्म्यं तस्मात्स्वाभासद्वारेणासंनिभ भासयतीति सर्वावभास
कः चित्स्वभावो वस्तुतो न किंचिदपि साक्ष्यसंस्पर्शश्च तैतस्य सर्वदैवासंगस्वभावत्वा
दित्याह ॥ तस्मात्सर्वविभासो ऽनः किंचिदस्य स्पर्शान्न सदा ॥ ५४ ॥ एष विवेकिनां मार्गो वि
पुरितस्तु विवेकिनो ऽस्त्राद्यवप्यासनो विशेषणत्वप्रसंगादित्याह ॥ प्रतिलोममिदं स
र्वं यथोक्तं लोकबुद्धितः ॥ अविवेकिधियामस्ति नास्ति सर्वं विवेकिनां ॥ ५५ ॥ लोके
बाह्यार्थोपहतचेताः तस्य बुद्धिर्बाह्यार्थप्रधानैव तेन बाह्यार्थप्रधानीरसतेहि ऽर्णा
त्वेन प्रत्यगर्थे लोको विनियुंक्ते ततो विपरीतमेतद्विशेषणविशेष्यत्वादि सर्वमविवेकिधि
यामनिवित्तात्मानात्मस्वरूपाणामस्ति विवेकिनामवगतात्मस्वरूपाणां पुनर्नेदं सर्वं
विद्यते स्वभावस्पर्शयामिव सर्वस्यात्माविद्याविलसितत्वादित्यर्थः ॥ ५५ ॥ नन्वेवम

प ॥ ८ ॥ आ प्रधानेवृते [illegible] न बाह्यर्थे ४

नातम २

न्वयव्यतिरेकाभ्यां सर्वसंसारधर्मविनिर्मुक्ता सावगममात्रं किं वाक्येनेत्याशंक्याह ॥ अन्वय
व्यतिरेकौ हि पदार्थस्य पदस्य च ॥ स्यादेतदहमित्यत्र युक्तिरेवावधारणे ॥ ९६ ॥ आत्मपदा
र्थो द्रष्टा साक्षी न ह्रष्ट्र्यः साक्ष्यं साभासाहंकारः सर्वं जगदात्मपदार्थस्यैव शेषस्तेन कश्चिदपि
जडोऽर्थः शेषी संभवति। आत्मेत्यादिपदमपि यथोक्तार्थस्यैव समर्पकं न कदाचिदपि दृश्यार्थमभि
करोतीत्येवं पदपदार्थयोरन्वयव्यतिरेकौ युक्तिरेव स्यादहमित्यत्र विवेकावधारणे न वाक्यार्थे
ऽन्वयव्यतिरेकव्यापारः तस्मादेतदेव वाक्यं वाक्यार्थावधारणे प्रभवतीत्यर्थः ॥ ९७ ॥ किंचा
वस्थाप्रत्ययत्रयं परस्परं व्यभिचारि चैतन्यं तु सुषुप्तेऽपि न व्यभिचारीति प्रकारान्तरेणा
त्मानात्मविवेकं दर्शयति ॥ ९८ ॥ नाद्राक्षमहमत्रास्मिन्सुषुप्तेऽन्यन्मनागपि । न वारयति
दृष्टिं स्वां प्रत्ययं तु निषेधति ॥ ९९ ॥ प्रतियत्तरतीत्यस्याः प्रत्ययशब्देन प्रमातृप्रमाणप्र
मेयलक्षणः सर्वो विशेषो गृह्यते ॥ १०० ॥ अन्वयव्यतिरेकव्यापारनिष्ठया प्रदर्शि
तास्या शास्त्रसंमता न स्वबुद्धिपरिकल्पितेत्याह ॥ १ स्वयंज्योतिर्न हि द्रष्टुरित्येवं सं

८४॥

विदोस्ति तां कौटस्थ्यं च तथा तस्याः प्रत्ययस्य च लुसत्तां ॥९८॥ स्वयमेवाब्रवीच्छास्त्रं प्रत्ययावगती
पृथक् । युष्मदस्मद्विवेकमेवमुपपाद्यावगतपदपदार्थं पुरुषं महावाक्यं फलवद्भवतीत्या
ह । एवं विज्ञातवाक्यार्थे श्रुतिर्लोकप्रसिद्धितः ॥ श्रुतिस्तत्वमसीत्याह श्रोतुर्मोहापनु
त्तये ॥९९॥ अवांतरवाक्यार्थो वाक्यर्थज्ञाद्भेनोच्यते ॥९९॥ वाक्यश्रवणमात्रान्मोहापो
हे दृष्टांतमाह ॥ छ ॥ ब्रम्हाहत्वारधैर्य्यद्रु दुत्यैवापानुदत्तमः ॥ तस्य विद्धुत्वसंबोधे
नयत्नांतरमूचिवान् ॥१००॥ दृष्टांते त्वं विद्धुरसीत्युक्तिमात्रादेव मोहनिवृत्तिरित्यत्र
हेतुमाह । तस्येति ॥ तत्वमसीति बोधितोपि मुमुक्षुरहं ब्रम्हेति न प्रतिपद्यते । कर्त्ताह
मित्यादि प्रत्यक्षाविरोधादित्याशंक्य कर्तृत्वभोक्तृत्वसाक्षिणोऽहमादिज्ञाद्वृत्तेः क्षि
तस्य ब्रम्हत्वोपदेशान्नैवमित्याह ॥ छ ॥ अहंशब्दस्य यानिष्ठा ज्योतिषि प्रत्यगात्म
नि ॥ सैवोक्तासदसीत्येवं फलं तत्र विमुक्तता ॥१०१॥ तत्रेति सत्यम्या वाक्यार्थज्ञान
मुच्यते ॥१०१॥ यदि पुनैवगतपदपदार्थस्य वाक्यादहं ब्रम्हास्मीति ज्ञानं समस्तसंसारनिव

॥८४॥

कृ१

165

तीकेनेष्यते तदा प्रामाण्यसिद्ध्यर्थमेवावश्यं कार्यपरत्वं कल्पनीयं न च तथुक्तं विद्वदनुभवविरोधादि
त्याह ॥ श्रुतमात्रेण चेत्[illegible]न्तस्यात्कार्यं तत्र नवेद्धुवं ॥ किंच सिद्धेर्थे शास्त्रस्याप्रामाण्यं किंवि
विपर्यासलक्षणं किंवा निष्फलत्वं उत संशयरूपमनुसृत्यात्मकं वा नाद्य इत्याह ॥ छ ॥
व्यवहारात्पुरापीष्टः सद्भावस्त्वयमात्मेनः ॥ १०२ ॥ शास्त्रीयव्यवहारात्पूर्वमप्यात्मसद्भावस्येष्ट
त्वात् । न शुक्तिरूप्यज्ञानेवत् ब्रह्मात्मज्ञानस्याप्रामाण्यमित्यर्थः ॥ १०२ ॥ द्वितीयं प्रत्या
ह ॥ छ ॥ अज्ञानाद्यादिनिर्मुक्त्यैव तत्काला जायते प्रमा । वाक्यश्रवणसमकाले वाज्ञानाद्या
दिनिवृत्त्यर्थं विदुषां प्रमोपजायते । तेन वाक्यस्य नास्ति नैष्फल्यमित्यर्थः ॥ तृतीयं दूषय
ति ॥ छ ॥ तत्त्वमस्यादिवाक्यार्थे त्रिषु कालेष्व संशयः ॥ ३ ॥ तत्र हि प्रमाज्ञायमाना कदा
चिदपि संशयवती न भवतीत्यर्थः ॥ कुफडादिशाब्दवदनुसृतिलक्षणमपि नाप्रामाण्यमिहा
स्तिपदार्थज्ञानस्य प्रतिबंधस्याभावादिति चतुर्थं शिथिलयति छ ॥ प्रतिबंधविहिनत्वात्स्व
यं चानुभवात्मनः ॥ जायते व प्रमात त्रस्वात्मन्येव न संशयः ॥ ४ ॥ प्रमाणस्वरूपनिरूप
णे नाहं ब्रह्मास्मीतिज्ञानमुत्का प्रतिपत्स्वरूपनिरूपणे नापि वाक्यादपरोक्षात्मज्ञा

पद३

व ४

क१

नमेवयुक्तमितिवक्तुंविकल्पयति॥छ॥ किंसदेवाहमस्मीतिकिंवान्यःप्रतिपद्यते॥ तत्राद्येविकल्पेपरेस्त्या
निष्टापत्तिमाह॥छ॥ सदेवचेदहंशब्दःसतामुख्यार्थइष्यतां॥५॥ द्वितीयंप्रत्याह॥छ॥ अन्यश्चे
त्सदहंमाहीप्रतिपत्तिर्मृषैवसा प्रमाणस्यरूपस्यप्रमतत्स्वरूपस्यचनिरूपणेनवाक्यादहंब्रह्मास्मीत्य
परोक्षप्रतिपत्तिरेवयुक्तेत्युपसंहरति॥छ॥ तस्मान्मुख्यग्रहेनास्तिवारणंभवगतेरिह॥६॥ तत्व
मसिवाक्यमिहेसुच्यतेकूटस्थत्वादात्मनोप्रमातृत्वानुपपत्तौफलसंबंधोनसिद्ध्यतीत्यस्या
त्मग्रहनिवारकत्वंइत्याशंक्याह॥छ॥ प्रत्ययीप्रत्ययश्चैवयदाभासोतदर्थता॥ तयोरचिति
मत्वाच्चै [illegible] उत्वाच्चतद्द्वारस्यफलस्यकल्पनयात्मसंबंधःस्यादित्यर्थः॥७॥ निर्व्यापार
स्यापिफलसंबंधेदृष्टांतमाह॥छ॥ कूटस्थेपिफलंयोग्यंराजनीवजयादिकं॥ तदंता
त्मतत्वहेतुभ्यां क्रियायाःप्रत्ययस्यच॥८॥ राजामात्ययोःस्वस्वामिसंबंधोस्ति
नाध्यक्षाध्यक्ष्ययोरितिवैषम्यमाशंक्योक्तं [illegible] तदंतेति॥ प्रत्ययस्यपरिणा
मिनस्तत्क्रियायाश्चपरिणामस्यकूटस्थात्माधिष्ठानत्वात्तदात्मनाचात्मवत्वा
=चैतन्येकल्प्यतेफलं॥७॥ परिणामिपरिणामयोरात्मामासपाजोरात्मरोप[illegible]

परिशुद्धस्य प्रमातृत्वं नास्तीत्यभिप्रेत्येदमुक्तं इदानीं चित्प्रतिबिंबस्य तु भवत्येव वस्तोपाधिव्यापारेण प्र
मातृत्वमित्याह ॥ छ ॥ आदर्शस्य यदाभासो मुखाकारः सराव सः ॥ यथैवं प्रत्ययादर्शो यदाभासस्तथाह्य
हं ॥ २ ॥ येन मुखाकारेण विशिष्टतया भास्यते इति यदाभासो यमादर्शः स च मुखाकारस्तत्र दृश्यमानस्सरा
वमरीवादेशस्थो मुखाकार एवेति बिंबप्रतिबिंबयोरैक्यं यथा लोके प्रसिद्धमेवं प्रत्ययादर्शो हंकारो येन
चित्प्रतिबिंबेन भास्यते इति यदाभासस्स चित्प्रतिबिंबः यः स एव बिंबकल्पः परमात्मैव ॥ तथा हि बिंब
प्रतिबिंबयोरेकत्वे सत्यहं ब्रह्मेति ज्ञानं सिध्यतीत्यर्थः ॥ यस्मादंतःकरणस्यात्माभासस्य परमार्थात्म
नश्च प्रागुक्तरीत्या संबंधोस्ति तस्मादहं ब्रह्मास्मीत्येवमधिकृतस्य प्रतिपत्तिः स्यात् ॥ उक्तसंबंधानं
गीकारे तु नैव प्रतिपत्तिर्युक्ता तस्मादुक्तसंबंधो वश्यं भवतीत्याह ॥ छ ॥ इत्येवं प्रतिपत्तिः स्यात्सद
स्मीति च नान्यथा ॥ उक्तसंबंधानभ्युपगमे दोषांतरमाह ॥ छ ॥ तत्त्वमित्युपदेशोपि द्वाराभावादनर्थकः ॥ १० ॥
उपदेशस्यानर्थकत्वं स्पष्टयति ॥ छ ॥ श्रोतुरस्यादुपदेशश्चेदर्थवत्त्वं तदा भवेत् ॥ आभासद्वारक
स्य श्रोतुः स्तत्त्वमस्याद्युपदेशस्यार्थवत्त्वं आभासानंगीकारात्तदभावे तदानर्थक्यमित्यर्थः ॥ किंच

(168)

त्रिर   क्षय३   व१

श्रोतृत्वमध्यक्षस्यान्यस्य वा विवक्षितं प्रथमे प्रागुक्तन्यायेनोपदेशस्य युक्तमर्थैत्वं द्वितीये च ध्य
क्षव्यतिरिक्तस्य जडस्यान्त्र श्रोतृत्वोपपत्तिरित्युक्तदोषतादवस्थ्यमित्याह। अध्यक्षस्य नचेदिष्टं श्रो
॥८६॥ तृत्वं कस्य तद्भवेत् ॥११॥ अध्यक्षाध्येयोः श्रोतृत्वाभावेपि परमात्मसमीपवर्तमानाया बुद्धेरेव श्रोतृत्व
स्यादिति शंकते ॥७॥ अध्यक्षस्य समीपस्याद्बुद्धेरेवेति चेन्मतं। यथा काष्ठादेर्जडतया बुद्धेरुपकारो नास्ति त
था संनिहितेन अध्यक्षेण कृतोपि चियाबुद्धेरुपकारो नांगीक्रीयते। यथा अध्यासानंगीकारात् तत्पाच
सामीप्यमात्रेण बुद्धेः श्रोतृत्वं। कल्पयितुमशक्यमित्याह ॥७॥ नतह्यतापकारोस्ति काष्ठाद्यद्वन्नकल्प्यते ॥१२॥
ध्य६ बुद्धावप्युक्ततः सन्नुपकारो मया नाभ्युपगम्यते तदभ्युपगमे सत्यध्यक्षस्य परिणामित्वप्रसंगादिति
शंकते। ॥७॥ बुद्धौ चे[illegible] नोक्ततः कश्चिन्नैवं परिणामिता॥ कृतिस्मृतिन्यायानुगृहीतेन चिदाभासेन बुद्धि
गते स्विदुक्तेन तज्जनकत्वमात्रेणानाध्यक्षस्य परिणामित्वप्रसक्तिरित्याह ॥७॥ आभासेपि च को दो
षः सति स्मृत्याद्यनुग्रहे ॥१३॥ उक्तमेव न दृष्टांतेन स्पष्टयति ॥७॥ आभासपरिणामश्चेन्न रज्ज्वादिवि
त्ववत्। सर्पादेश्च तथात्वाच्च यथादर्शे च मुखवत् ॥१४॥ यथा रज्ज्वज्ञानविजृंभितस्य सर्पादेर ॥८६॥

तद२ ७४ नि१

उनिभत्वं मिथ्यात्वं तथाभासनोज्ञानविजृंभितस्य बुध्यादेर्मिथ्यैवचि[illegible]त्वं तस्मादाभासजनकत्वा
नुरोधेनैपरिणामित्वमाभासनोनैववरं किंतव्यभिचारः। किं चादर्शमुखस्यावस्थितत्वं मिथ्यानपरि
णामइत्युक्तं [illegible] दृष्टांतावाभासनोवस्थितत्वं मिथ्यात्वक्तत्यान्यपरिणामित्वप्रसक्तिरित्युक्तं स्मारय
तितत्पेतिबुद्धेरवास्तवत्वंगृहीत्वातस्याभिव्य[illegible]त्वं माक्षिपति। ७। नाभासाभासश्च सिद्धिः स्यादा
सनोग्रहणात्पृथक्। मुखादेस्तु पृथक्सिद्धिरिहत्वन्योन्यसंश्रयः॥१५॥ बुद्धेराभासवत्त्वं न
सिध्यति आसनाबुद्धेः सकाशात्पृथग्ग्रहणाभावादित्युक्तमेतत्। आदर्शमुखतदाभासवबु द युप
ध्यात्मतदाभासानां पृथक्प्रथनसंभवादिसार्थक्याह। मुखादेरिति। अन्योन्याश्रयत्वमेव वि
शदयति॥७॥ अध्यक्षस्य पृथक्सिद्धावाभासस्य तदीयता॥ आभासस्य तदीयत्वेऽध्य
क्षव्यतिरिक्तता॥१६॥ स्वप्नावस्थायां प्रत्येयस्यान्तःकरणस्य दृश्यस्य साक्षिणः। साक्ष्यसाक्षी
भावेन भेदस्य प्रतिपन्नत्वान्नास्तिपरस्पराश्रयतेत्युत्तरमाह। ८। नैवं [illegible]ः [illegible] स्वप्ने पृथक्
सिद्धेः [illegible]प्रत्येयस्य दृशोस्तथा॥ स्व

प्रत्ययस्यैव ग्राह्यत्वमुपपादयति ॥ ७ ॥ रूपादेस्तच्च शून्यत्वात्प्रत्ययस्यास्तनो ग्रहः ॥ १७ ॥ तत्र विषयांतरस्याभावादंतःकरणस्यैव वासनात्मकस्य आत्मसंनिधाने तेन ग्रहणमित्यर्थः ॥ आत्मनोंतःकरणसाक्षिणो ग्राह्यव्यतिरेकार्थं ग्राह्यस्वरूपमाह ॥ ७ ॥ अवगत्या हि संव्याप्तः प्रत्ययो विषयाद्यतिः ॥ जायते स यदाकारः स बाह्यो विषयो मतः ॥ १८ ॥ प्रत्ययोंतःकरणं घटादिः साक्षिव्यतिरिक्तो विषयो दर्शितः ॥ १८ ॥ संप्रति कर्मकर्तृकरणमिति चिंतयंस्तस्मात् साक्षिव्यतिरेकार्थं कथयति ॥ ७ ॥ कर्मेप्सिततमत्वात्स तदन्यत्कार्यमिष्यते ॥ आकारो यत्र चार्प्येत करणं तदिहोच्यते ॥ १९ ॥ स बाह्यो विषयः कर्मेत्युच्यते प्रमाणक्रियया व्याप्तुमिष्टतमत्वात् तदनु बाह्यविषयेच्छावान् कार्ये कर्तृविति च्योदयाप्रियते स कर्तृत्वीयच्च बुद्धिपरिणामे विषयेणाकारः समर्पितः तज्ज्ञानं कारणं विषयाभिव्यक्तेरित्यर्थः ॥ घटादिव्यक्तिः समभ्यर्थः ॥ १९ ॥ यस्य चैतन्यस्याभासेन संप्राप्तोहंकारः परिणामतेसु चिद्रूपतुर्यां ज्ञतेत्याह ॥ ७ ॥ यदाभासेन संव्याप्तः स ज्ञातेति निगद्यते ॥ कर्त्रादित्रयं ज्ञात्रादित्रयं भूतेयाभोक्त्रादित्रयं च श्रेयो मार्गेष्वप्यात्मसाक्षिणो विविच्य योद्धुं बुध्यते स लक्ष्यत्वं पदार्थं यथावदवगच्छ

तीत्याह ॥ ७ ॥ त्रयमेतद्विविच्यात्र यो जानाति स प्राप्तवित् ॥ २० ॥ यथा प्रमात्रादिभ्यो वैवित्त्यं नित्यावगतिस्व
भावस्यात्मनो दर्शितं तथा प्रत्ययभेदेभ्यो वैवित्त्यं प्रत्येतव्यमित्याह ॥ ७ ॥ सम्यक्संशयमिथ्योक्ताः प्र
त्ययाव्यभिचारिणः ॥ एकैवावगतिस्तेषु भेदस्तु प्रत्ययार्पितः ॥ २१ ॥ अवगतावपि सम्यगवगतिः संश
यावगतिर्मिथ्यावगतिरिति भेदो भातीत्याशंक्य प्रत्ययैरेवोपाधिभूतैस्तत्र भेदोर्पितो न स्वतस्त

५३

स्मादेकैवावगतिरित्याह ॥ भेदस्त्विति ॥ २१ ॥ उक्तमर्थं दृष्टान्तेन स्पष्टयति ॥ ७ ॥ उपाधिभेदाद्यथा भे
दो मणेरवगतेस्तथा ॥ आत्मनि रागादिमत्वं कर्तृत्वादिमत्वं च सर्वमपि भेदवत्तैः दंकरणोपाधिकृतं
न वास्तवमित्याह ॥ ७ ॥ अशुद्धिः परिणामश्च सर्वं प्रत्ययसंश्रयात् ॥ २२ ॥ ग्राहकादिव्यतिरिक्तात्म
सिद्धौ किं प्रमाणमुक्तमित्याशंक्याह ॥ ७ ॥ प्रथनं ग्रहणं सिद्धिः प्रत्ययानामिहान्यतः ॥ आपरोक्ष्या
न देवात्मनुमानं प्रदीपवत् ॥ २३ ॥ इह व्यवहारभूमौ प्रत्ययानां बुद्धिवृत्तीनां प्रथनं प्रकाशनं ग्र
हणं गृहीतुरूपादानं सिद्धिः सत्वाभ्युपगमश्चान्यतो भवितुमर्हति ॥ अपरोक्षत्वात्प्रत्ययानां स्वतस्तद्यो
गोचरदनेनानुमानमेवोक्तं भवति ॥ तत्र दृष्टान्तमाचष्टे ॥ प्रदीपवदिति ॥ साश्रयाः प्रत्ययाः स्वव्यतिरि
क्ताधीनसिद्धिकाः अचिद्रूपत्वात् ॥ ये त्वचिद्रूपाः ते स्वातिरिक्ताधीनसिद्धिकाः यथा दीपाधीनसि

॥८८॥

ग्र२

द्विकाघटाइत्यर्थः॥२३॥ येतुनिषेधमुखेनैवात्मनिप्रमाणप्रवृत्तिंमन्यंते तान्प्रतिविधिमुखेनापि
प्रमाणवृत्तिंप्रतिपादयितुंविकल्पयति॥छ॥ किमङ्गंगाह येनकश्चित्प्रमाणेनतुकेनचित्॥ विनैववा
प्रमाणेननिवृत्यान्यस्वरूपतः॥२४॥ कथंप्रमाणेनविनाप्रतिपादनंतत्राह॥ निवृत्येति॥ आत्मन्या
रोपितस्यानात्मनोनिरासद्वारेणाध्यक्षस्याविशिष्टत्वात्तस्यमानेनविनाप्रतिपत्तिरित्यर्थः॥२४॥
प्रथमेविकल्पेप्रमाणप्रवृत्तिर्विधिमुखेनैवेष्टव्यंगीकृत्यद्वितीयमनुवदति॥छ॥ शब्देनैव
प्रमाणेननिवृत्तिश्चेदिहोच्यते॥ आत्मन्यध्यस्तस्यशब्देननिवृत्तिरेवोच्यते। स त्वात्मामानेन
विनासिध्यतिचेदित्यर्थः॥ अस्मिन्पक्षेब्रह्मात्मनोमानांतरेणाध्यक्षस्याप्रसिद्धेःशब्दस्यच
तत्राव्यापारादात्मनःशून्यतैवप्राप्नोतीतिदूषयति॥छ॥ अध्यक्षस्याप्रसिद्धत्वात्शून्यते
वप्रसज्जते॥२५॥ चेतनाचेतनयोर्विरुद्धरूपकथनेनान्यनिवृत्तिःशब्देनक्रियतेतेनकुतःशून्य
ताप्रसक्तिरितिशंकते॥छ॥ चेतनस्त्वंवपुर्देहइतिचेन्ना प्रसिद्धितः॥ चेतनस्यान्यताशिक्षायेवंस्या

॥८८॥

व२

देहादिव्यतिरिक्तस्य चेतनस्याप्रसिद्धत्वान्नैवमितिप्रत्याचष्टे॥ नेत्यादिना॥ सिद्धे हि धर्मिणि प्रतियो
गिनि चायं अयं न चेतीति तादात्म्यनिषेधे न विरुद्धरूपत्वोपदेशः स्यात्॥ न चाद्यापि चेतन
पदार्थो ज्ञस्य पृथक् सिद्धोऽस्तीत्यर्थः॥२६॥ स्वतःप्रसिद्धत्वादात्मा नात्यंतमसिद्धः स्यादिति शंकते
७॥ अध्यक्षः स्वयमस्त्येव चेतनश्चापरोपक्षतः॥ यथा शून्यवादिनां स्वतः सिद्धोऽस्त्येव तस्मिन्नप्र
माणांतरेण प्रबोधो जायते तथा ज्ञस्यापीत्युत्तरमाह॥ ७॥ तुल्य एवं प्रबोधः स्याद् ज्ञस्यासत्त्ववा
दिनां॥२७॥ स्मृतिबलेन स्वतःसिद्धाध्यक्षस्य सिद्धिरिति शंकते॥ ७॥ अहमज्ञासिषं चेदमिति
लोकस्मृतेरिह॥ करणं कर्म कर्त्ता च सिद्धास्त्वेकक्षणे किल॥२८॥ इह व्यवहारभूमौ लोक
प्रसिद्धकर्त्रादिविषयस्मृत्यनुरोधादेकस्मिन्नेव क्षणे कर्त्रादयः सिद्ध्यंति॥ नहि तेषां स्मृतिर
नुभवादृते युज्यते॥ अनुभूते स्मृतिनियमादतो यतस्त्रयोऽपि युगपदनुभूयंते सोऽध्यक्षः स्व
तःसिद्धोऽस्तीत्यर्थः॥२८॥ एतन्निराकरोति॥ ७॥ प्रामाण्येऽपि स्मृतेः शंक्या यौगपद्यं विभाव्यते॥
क्रमेण ग्रहणं पूर्वं स्मृतिः पश्चात्तथैव च॥२९॥ पूर्वानुभवग क्रमकत्वाच्छेन स्मृतेर्यद्यपि प्रामा

प्र३

न्य २

॥८१॥

ण्यं तथापि न युगपत्त्रितयसिद्धिगमकत्वं यस्मात्क्रमेणैव एवं ग्रहणं वृत्तं स्मृतिरपि पश्चात्तथै
व भवति॥ यौगपद्यं तु ज्ञानपत्रपत्रज्ञातभेदनवदतिशैघ्र्यात्प्रतिभाति ई[illegible]पि संभावितत्वा
दित्यर्थः॥२१॥ स्मृतेर्यौगपद्याभावे हेत्वंतरमाह॥४॥ अज्ञासिषमिदं मां वेत्यपेक्षा जायते ध्रुवं।
विशेषोपेक्ष्यते यत्र तत्र नैवैककालता॥३॥ केनचिदज्ञासिषमित्येके विषये वामातरि वात
वज्ञानमिति श्रोतुर्विशेषापेक्षा निश्चयेन दृश्यते॥ यत्र विशेषोपेक्ष्यते तस्मिन्विषये नैवैकका
लता स्मृतेर्युक्ता कर्तृकरणकर्मणामनुभवस्य यौगपद्ये त्रितयविषयस्मृतेरपि यौगपद्यात्रपा
णामव्यभिचाराद्विशेषापेक्षाभावादतस्तदपेक्षादर्शनान्न यौगपद्यं त्रितयानुभवस्य तदी
यस्मृतेश्चेत्यर्थः॥३॥ कर्त्रादीनां युगपदनुभवसाधनाभावादपि युगपन्नास्ति सिद्धिरित्याह।
आत्मनो ग्रहणे वापि त्रयाणामिह संभवात्॥ एकैकस्य स्वरूपस्य ग्रहणे अन्येषां त्रयाणां कर्तृ
करणकर्मणां अपेक्षासंभवादनवस्था स्यादित्यर्थः॥ तैरेव कर्त्रादिभिरन्योन्यस्वरूपसि
द्धेर्नीनवस्था स्यादित्याशंक्याह॥५॥ आत्मन्यासक्तकर्तृत्वं न स्यात्करणकर्मणोः॥३१॥

(175)

॥८०॥

न्य१

स्वरूपसिद्धौ कर्तुरुपक्षीणं कर्तृत्वं करणकर्मणोः सिद्धौ तदेव न स्यात् अत्रोपक्षीणत्वान्न च
कर्त्रादेः स्वरूपसिद्धिं प्रति कर्तृत्वादियुक्तं एकत्र तद्भावस्य विरुद्धत्वादित्यर्थः॥३१॥ कर्त्रादीनां यौग
पद्येन सिद्धिरित्यभ्युपगमे व्याकरणविरोधोपि स्यादित्याह॥०॥ व्याप्तुमिष्टं च यत्कर्तुः क्रियया क
र्मतत्स्मृतं॥ कर्तृकरणकर्मणां पूर्वपूर्वोपपन्नत्वादुत्तरोत्तरसिद्धेर्न युगपत्सिद्धिरित्याह॥०॥ अतो हि कर्तृ
तन्त्रत्वं तस्येष्टं नान्यतन्त्रता॥३२॥ विधांतरेणानधिगतवस्तुप्रतिपत्तेरयोगाद्विधिरूपेण प्रवृत्तप्र
माणेनैव तथाभूतवस्तुसिद्धिरिति फलितमाह॥ शाब्दाद्वानुमितेर्वापि प्रमाणाद्वा ततोन्यतः॥ सि
द्धिः सर्वपदार्थानां स्यादज्ञं प्रति नान्यथा॥३३॥ जडानामर्थानां प्रमाणादेव सिद्धत्वेपि चेतनस्याध्य
क्षस्य नैवमित्याशंक्य निरस्तात्रोषानर्थस्यापि तस्य तत्त्वमस्यादिवाक्येन वा सिद्धिर्वाक्यमंतरे
णस्वमहिम्ना वा सिद्धिरिति विकल्पयति॥०॥ अध्यक्षस्यापि सिद्धिः स्यात्प्रमाणेन विनैव वा॥ यदि त
त्त्वमस्यादिवाक्येनावगतिस्तदा सा संसारनिवर्तकत्वेनोपयुक्तेत्यंगीकृत्य द्वि
तीयं प्रत्याह॥०॥ विना स्वस्य प्रसिद्धिस्तु नाज्ञं प्रत्युपयुज्यते॥३४॥ प्रमाणं विना स्व
स्याध्यक्षस्य या स्वमहिम्ना सिद्धिः सा नाज्ञं प्रत्युपयुज्यते॥ सत्यामपि तस्यां सकार्याज्ञा

नानिवृत्तेरित्यर्थः॥२४॥ किंचाज्ञत्वमपि चेत्तन स्यादहंकारस्य वायदि ब्रह्मात्मनश्चेत्तन स्यादज्ञत्वं स्यात्॥ त
दा तस्य ज्ञाने स्वरूपव्यतिरिक्ते तत्त्वमस्यादिलक्षणान्याभितिरेच्छ्या स्वरूपविज्ञानस्याज्ञानल
क्षणापनिवर्तकत्वादपीत्याह॥ छ॥ तस्यैवाज्ञत्वमिष्टं चेत्कूटत्वेन्याभितिर्भवेत्॥ यदि पुनरध्यक्षव्य
तिरिक्तस्य कस्यचिदहंकारादेरज्ञता तदापि प्रकृतस्याध्यक्षस्य विज्ञानार्थं ध्रुवा अव्यभिचारिणी भि
तिरेष्यान बाध्यक्षव्यतिरिक्तो ज्ञोस्ति। नान्योतोस्ति द्रष्टेत्यादिश्रुतेरित्याह॥ छ॥ अन्यस्यैवाज्ञ
तायां चेत तद्विज्ञाने ध्रुवा भवेत्॥ २५॥ अध्यक्षस्य सिद्धस्वरूपत्वान्मानापेक्षा नास्तीत्याह॥ स्य सिद्धि
ग्रहार्थं विकल्पयति॥ छ॥ ज्ञातृत्वात्स्वात्मनो भो वा सिद्धिरन्यदेव वा॥ अन्यदिति स्पष्टत्वमुच्यते॥
प्रथमं प्रत्याह॥ छ॥ ज्ञातृत्वेन तरोन्नो त्वं पक्षो स्मर्तुमर्हसि॥ २६॥ यदि ज्ञातृत्वं सिद्ध्यर्थः स्वीक्रि
यते॥ तदा तस्यैवाज्ञत्वमिष्टं चेदित्यादिनोक्तौ पक्षावनुसंधातव्यौ तत्र चाध्यक्षस्यान्यस्य वाज्ञत्वे
ज्ञातव्ये॥ स्वप्रमाणादेव सिद्ध्यतीत्युक्तं अतो ज्ञातृत्वसिद्ध्यर्थ बलोध्यक्षे प्रमाणप्रवृत्तिः स्या
दित्यर्थः॥ द्वितीयमनूद्य लब्धस्वरूपे तस्मिन् प्रमातृव्यापारवैयर्थ्यं स्यादित्याह॥ छ॥ सिद्धिः स्या

स्या ५

॥१॥

देवा २

स्यात्सत्ताभश्चे घलस्तत्रानरर्थकः॥ वस्तुस्य स्वरूपलाभार्थमेव प्रमात्रादिव्यापारोऽर्थवानि
सारं व्याह॥८७ सर्वलोकप्रसिद्धत्वात्स्यात् हेतुश्च स्तत्र वस्तुनः॥२७॥ द्वितीयपक्षासंभवे
फलितमाह॥ ज्ञानस्ते याद्विवादेनः सिद्धिर्शान्तिलमु[illegible] च्यते॥ ज्ञानं ज्ञेयं ज्ञानाच्चास्ती
ति यस्य वादस्तस्य पक्षे ज्ञातत्वमेव सिद्धिशब्दार्थः स्यादित्यर्थः॥ ज्ञातत्वमेव व्याकरोति॥ अध्यक्षा
ध्यस्ययोः सिद्धिः ज्ञातत्वं नाम लोभता॥३८॥ त्रितीयं विकल्पं उथापयति॥ ८७॥ स्पष्टत्वं कर्म कर्त्रा
दें सिद्धतायदि कल्प्यते॥ चिदाभासोदयानुदयद्वारा कर्त्रादेः स्पष्टत्वास्पष्टत्वे साक्षिणः स्यातां न
तु केवलस्य कर्त्रादेरिति दूषयति॥ ८७॥ स्पष्टता स्पष्टते स्यातामन्यस्यैव न चात्मनः॥३७॥ उक्तमेवा
र्थं दृष्टान्तेन स्पष्टयति॥ ८७॥ अदृष्टैर्नैव चाघस्य स्पष्टीभावो घटस्य तु॥ दृष्टिरहितस्य जडस्य घटा
दितु[illegible]ल्यस्य वा अंधस्य वा ज्ञानेन विषयत्वव्यतिरिक्तं प्राकट्यं नामे[illegible] किंच
न न स्पष्टत्वमभीष्टमस्ति न हि घटकर्त्तृकं साक्षात्प्रत्येसं भवतीत्यर्थः॥ यदि कर्त्रादेः स्पष्टत्वं प्राक
ट्यं नाम स्वंते हिंताद्विलक्षणस्यैवाभासद्वारा दृष्टता[illegible] क्व्येति फलितमाह॥ ८७॥ कर्त्रादेः स्पष्टते

नाश्चेद्द्रष्टृताध्यक्षकर्तृका॥४०॥ अदृष्टदृष्टिरहितस्य जडस्य द्रष्टृरूपिनैवांधस्येवांधस्य स्पृष्टी
भावः॥ साक्षात्प्रथनं घटस्य पर्यायाकेवलस्यामनो ज्ञानस्य केवलमस्यामनः चिदाभासरहितस्य नै
वकस्यादिः स्पष्टतानष्टस्यादित्यर्थः॥ यस्मादेवं केवलात्मनोः कस्यादिः स्पष्टता नोपपद्यते कस्यादिर्मनःस्प
ष्टता साक्षादवभासतामिप्रेताचेद्द्रष्टृता साक्षिता ध्यक्षकर्तृता मोहादवध्यक्षावध्यक्षादि नाभ्युपेयाय
यस्मादेवं प्रमाणविरुद्धः सिद्धिरीब्दार्थोक्षेध्ये संबंधेन संभवतीति तस्मादध्यक्षे विधिमुखेन प्रमाण प्रव
त्तिराभास द्वारेणाभ्युपेयेत्यर्थः॥ एवमध्यक्षस्य तत्सिद्धस्यापि प्रमाणव्यतिरेकेण प्रतिपादनानुपपत्तेः॥
प्रमाणवत्त्वेप्याभास व्यतिरेकेणानुपपत्तेः। द्वाराभावादाभासो भ्युपगंतव्यो हे हरिकारा
दोच तदभ्युपगमेस्याध्यक्षस्य कूटस्यस्यापि साक्षित्वं साक्ष्याधीनेन संसारभ्रमास्ति द्वारेण प्रमाणे प्रवृत्तिश्चोप
पद्यते इत्युक्तं इमं पक्षमसहमानाः सौगताः प्रत्यवतिष्ठंते कथं बुद्धिव्यतिरिक्तो बुद्धेः साक्षिणाभ्युपगम्यते बुद्धे
श्चानुभवमायायाः प्रवर्तणोपेक्षाभावात् न प्रमाणप्रवृत्तिः क्वचिदप्युपपद्यते इति तन्मतनिराचष्टे दश
भिश्लोकैर्बुद्धिव्यतिरिक्तं साक्षिसंसाराध्य

॥श्रीराम॥ त्यो २

क्षं तत्र च पूर्वोक्तप्रकारेणैव प्रमाणप्रवृत्तिं वक्तुकामः प्रथमं पूर्वपक्षं दर्शयति। अनभूतेरि त्युक्तमसृष्यमाणः शाक्यः शंकते। ७।
अनुभूतेः किमन्यस्मिन् स्यात्तत्त्वोपेक्षया वेद ॥ तस्याः स्वयंप्रकाशत्वाद् अन्यापेक्षयान किंचित्फलतीत्यर्थः। अनुभूतेर्भावेति-
नानुभवितृत्वाधीनत्वात्तस्मिन्न्यपेक्षाभीष्टेत्याशंक्यानुभविताप्यस्माकमनुभूतिरेव व्यतिरेकेप्रमाणाभावादित्याह ॥ ८।
अनुभवितरि स्वात्वेऽप्यनुभूतिरेव नः ॥ ८॥ कथं पुनरनुभूतिरनुभवितानुभाव्यश्चेति भेदव्यवहारः स्यादित्याशंक्यानुभूति
रेव क्षणिका संतत्याभेदेन भातीत्याह। ९। अविभागोपि बुद्ध्यात्मा विपर्यासितदर्शनैः। ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष
ते ॥ १०॥ येषां पुनः श्रुतिरनुभूतिर्यासैव क्रियाकारकं च सैवोच्यते। तेषां कोन्यो बुद्ध्यतिरिक्तः स्यादित्याह। ११। भूतिर्येषां
क्रिया सैव कारकं चैव सोच्यते ॥ यदुक्तमनुभूतेरन्यापेक्षा नास्तीति तच्च क्रमसो जन्म विनार्यती [illegible] विकल्प्याद्यं ज-
न्म विना द्रव्याद्यतिरिक्तकर्त्रधीनत्वदर्शनादनुभूतेः सकर्तृकत्वमपि स्वीकर्तव्यं तथा सति तस्या नान्यापेक्षेत्ययुक्तमित्याह। १२। सल्ल
नो [illegible] त्वमस्याश्चेत्तु सकर्तृ[illegible]लेन नथेष्यतां ॥ १३॥ द्वितीयपक्षस्तु [illegible] कत्वपक्षक्षतिरित्याह। १४। न च स्वच्छेष्यते धर्म इति चेत्पक्षहान-
ता ॥ धर्माणामन्यापोहरूपत्वाद्भोक्तदोषोस्तीति शंकते। १५। नन्वस्तित्वादयो धर्मा नास्तित्वादिनिवृत्तयः। १६। स्वेनैव लक्ष्यते
ण्यतइति स्वलक्षणत्वेन स्वभावः स्वालक्षण्यं तत्त्वानुभूतेरभिमतं ततः सविकल्पकज्ञानाविषयत्वाद्रागादीनां च सविकल्पकगो-
चरत्वादनुभूतेर्नारीलादि न प्राप्नोतीति दूषयति ॥ १७॥ नभूतेस्तर्हि नास्तित्वं स्वालक्षण्यं मतं हि तैर्लानैव स्फुरयति ॥ १८॥ स्वलक्ष
णावधी [illegible] शोभाशोना [illegible] निवृत्तता। स्वलक्षणं स्वप्रमाणकं वस्तुनाशावधिः सीमा समस्तविकल्परहिता मतुप्रीतिं न स्पृशं

शा ७

चौ

रि ५

नी १

180

य१

शक्नोतीत्यर्थः। किं च नाशो नामानाशानिवृत्तत्वं अनाशो नामपि नाशानिवृत्तत्वमेतेनान्योन्याश्रितत्वान्न वस्तुसंस्
र्शत्वमित्याह। अनाश इति॥४५॥ गोत्वादावपि लग्नमेतत्तुल्यमन्योन्याश्रयत्वमित्याह।छ॥ अगोरसत्व
गोत्वं तेन न तु तत्रौः स्वलक्षणं॥ अश्वत्वादेरगोः पदार्थस्य निवृत्तिस्तत्र गोत्व~~...~~त्वेन तु गोत्वं स्वलक्ष
तां वस्त्वस्तीति दृष्ट्या गोत्वं इतरव्यावृत्तिरूपमेवेत्यन्योन्याश्रयत्वात्तन्मते गोत्वादेरपि न सिद्धिरित्यर्थः
किं चापोहवादिपक्षे योपि क्षणशब्दवाच्यः स क्षणिकोर्थो विवक्षितः सोपक्षणिकाभावत्वोस्ति
गित्वेनाक्षणिकमर्थमाक्षिपतीत्याह॥छ॥ क्षणवाच्योपि पर्यायः स्यात्सोपि न्यायाभावपि वेते॥ किं चापोहस्य
भेदाभावेप्यगोत्वमनश्वत्वमित्यभिमभिभेदस्त्वमेष्यते स च न संभवतीत्याह॥छ॥ भेदाभावेप्यभावस्य भे
देनाममभिरिष्यते॥ किमित्यपोहस्य गोत्वादिनाम भेदाक्षेपेण न भवतीत्याशंक्य निःस्वभावत्वादित्याह॥छ॥ नो
ममभेदैरनेकत्वमेकस्य स्यात्कथं तव॥ किं च प्रतिव्यक्ति प्रतियोगिनामानंत्यात्तदवगममंतरेणापोहस्य
गविवृत्तिर्नशालुशंक्येत्याह॥छ॥ अपोहो यदि भिन्नानां वृत्तिस्तस्य कथं गवि॥ किं च क्षणिकत्वपक्षे गोत्वा
श्वत्वादयोन्यापोहत्वाद्भावाः संतानआवर्तकाः स्युः तथा खंडादयश्च न विरोधा भवेयुर्मिथः संबंधानि

१२॥ न४ दिना५ त्वा४

रूपणात्तथा च खंडो गौर्नीलमुत्पलमित्यादि विशिष्टव्यवहारानुपपत्तिरित्याह ॥ ४७ ॥ नाकारो वा भेदकाः सर्वे विशेषा वा कदाचन ॥ ४८ ॥ विशिष्टव्यवहारानुपपत्तौ दृष्टांतमाह ॥ ४८ ॥ नामजात्यादयो यद्वत्संविदस्ते विशेषतः ॥ ४८ ॥ यथा त्वत्पक्षे संविदो विशेषाभावान्नामजात्यादयो भेदका न भवंति ॥ तथा भेदाभावादपोहस्यापि विशेषणविशेष्यत्वासिद्धेर्विशिष्टव्यवहारानुपपत्तिरित्यर्थः ॥ किंच प्रत्यक्षमनुमानं च प्रमाणद्वयं भवतोक्तं तदनुरोधेन भूतिर्यक्षु क्रियासे वेकारकं सैव चेति मतं तद्धातव्यमित्याह ॥ ४८ ॥ प्रत्यक्षमनुमानं वा व्यवहारेषु पदीक्षितः ॥ क्रियाकारकभेदेस्तदृश्यरूपे स्यात्कथं भवेत् ॥ ४९ ॥ कल्पितमुपसंहरति ॥ ४९ ॥ तस्मान्नीलं तथा पीतं घटादि वा विशेषतां ॥ संविदस्तु रूपे संस्था नवाप्यनुभूयते ॥ ५० ॥ येनानुभूयते सोपि द्रष्टव्य उपगतव्यवहारेष्वत्रानुमानमाह ॥ ५० ॥ रूपानीयथा प्रत्ययस्य तथान्यस्या ग्राह्यकत्वाच्च दीपवत् ॥ ५१ ॥ प्रत्ययपराश्रिता बुद्धिः स्वव्यतिरिक्तग्राह्यग्राहकत्वात्प्रत्यक्षस्तथा ॥ प्रत्ययस्य तथान्यस्या ग्राह्यकत्वाच्च दीपवत् ॥ ५१ ॥ प्रत्ययपराश्रिता बुद्धिः स्वव्यतिरिक्तग्राह्यग्राहकत्वाद्रूपादिवदिति बुद्धिग्राहकसाक्षिसिद्धिरित्यर्थः ॥ किंच प्रत्ययः स्वातिरिक्तग्राहकग्राह्यो व्यंजकत्वाद्दीपवत् ॥ व्यंजकत्वं च जडप्रकाशकत्वमित्यास्थायेनानुमानांतरमाह ॥ तथेति ॥ कस्तर्हि साक्षिसंबंधो यः संबंधः स्यादित्याशंक्य द्रष्टृदृश्यत्वरूपेण तयोः संबंधं दर्शयति ॥ ४८ ॥ अध्यक्षस्य दृशोः कीदृक्संबंधः संप्रविष्यति ॥ अध्यक्षेधः स्यादित्याशंक्य द्रष्टृदृश्यत्वरूपेण तयोः संबंधं दर्शयति ॥ ४८ ॥ अध्यक्षस्य दृशोः कीदृक्संबंधः संप्रविष्यति ॥ अध्यक्षे
घः स्यादित्याशंक्य द्रष्टृदृश्यत्वरूपेण तयोः संबंधं द्रष्टृत्वं ॥ ५२ ॥ द्रष्टृदृश्यसंबंधास्युपगमे बलादाभासोभ्युपगंतव्य इति दर्शयितुं विवेकातु दृश्येन मुक्तान्यो द्रष्टृदृश्यतो ॥ ५२ ॥ द्रष्टृदृश्यसंबंधास्युपगमे बलादाभासोभ्युपगंतव्यश्च ॥ निसाध्यक्षद्रष्टनः ॥ कश्चिदुपकारो भवेद्धियां ॥ ५३ ॥ तेन पश्यति ॥ ४८ ॥ अध्यक्षेण कृतो दृष्टिर्दृश्यं व्याप्नोत्सथापि वा ॥ निसाध्यक्षद्रष्टनः ॥ कश्चिदुपकारो भवेद्धियां ॥ ५३ ॥ तेनपश्यति ॥ ४८ ॥ अध्यक्षेण कृतो दृष्टिर्दृश्यं व्याप्नोत्सथापि वा ॥

ष्यते ॥ ४
रवं ६
दी ७
द्ये ७
क्ष्य ४
क ४

(182)

व२.

॥१२॥

